# Sanskrit
## Paper II
# संस्कृतम्
## द्वितीयं प्रश्नपत्रम्

**समयः : 75 निमेषाः]** **[पूर्णाङ्काः : 100**

**सूचना :** (*i*) अस्मिन् पत्रे **पञ्चाशद्** बहुविकल्पाः प्रश्नाः सन्ति ।

(*ii*) प्रतिप्रश्नं **द्वौ** अङ्कौ स्तः ।

(*iii*) **सर्वे** प्रश्नाः समाधेयाः ।

1. ऋग्वेदस्य द्वितीयमण्डलस्य कर्ता कः ?

(A) विश्वामित्रः

(B) वामदेवः

(C) गृत्समदः

(D) भारद्वाजः

2. 'अपां नपात्' इत्येत् कस्य विशेषणं वर्तते ?

(A) वरुणस्य

(B) अग्नेः

(C) इन्द्रस्य

(D) पर्जन्यस्य

3. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत –

(*a*) शुक्लयजुर्वेदः

(*b*) कृष्णयजुर्वेदः

(*c*) ऋग्वेदः

(*d*) अथर्ववेदः

(*p*) गोपथब्राह्मणम्

(*q*) ऐतरेयब्राह्मणम्

(*r*) काण्वशतपथब्राह्मणम्

(*s*) तैत्तिरीयब्राह्मणम्

(A) *ar bp cs dq*

(B) *aq br cp ds*

(C) *as br cq dp*

(D) *ar bs cq dp*

4. 'चरैवेति ।' इति संदेशः कस्मिन् ब्राह्मणग्रन्थे अस्ति ?

(A) शतपथब्राह्मणे

(B) ऐतरेयब्राह्मणे

(C) गोपथब्राह्मणे

(D) जैमिनीयब्राह्मणे

5. अधस्तनवाक्यानां सत्यासत्यत्वपर्यायेषु समीचीनं विचिनुत –

(*a*) तैत्तिरीयोपनिषदि भृगुवल्ली वर्तते ।

(*b*) 'तेन त्यक्तेन भुञ्जीथाः ।' इति उपदेशः याज्ञवल्क्येन कृतः ।

(*c*) ऐतरेयोपनिषद् ऋग्वेदस्य वर्तते ।

(*d*) छान्दोग्योपनिषदि याज्ञवल्क्यमैत्रेयिसंवादो वर्तते ।

(A) सत्यम्, असत्यम्, सत्यम्, असत्यम् ।

(B) असत्यम्, सत्यम्, असत्यम्, सत्यम् ।

(C) असत्यम्, असत्यम्, सत्यम्, सत्यम् ।

(D) सत्यम्, सत्यम्, सत्यम्, असत्यम् ।

6. पारस्करगृह्यसूत्रं कस्य वेदस्य विद्यते ?

(A) शुक्लयजुर्वेदस्य

(B) कृष्णयजुर्वेदस्य

(C) ऋग्वेदस्य

(D) सामवेदस्य

7. हेतिः कस्य शस्त्रम् ?

(A) बृहस्पतेः

(B) मरुताम्

(C) यमस्य

(D) रुद्रस्य

8. ऋग्वेदप्रातिशाख्यस्य कर्ता कः ?

(A) शौनकः

(B) पाणिनिः

(C) शाकल्यः

(D) कात्यायनः

9. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत –

(*a*) अग्निमीळे पुरोहितम्

(*b*) स जनास इन्द्रः

(*c*) यच्चिद्धि ते विशो यथा

(*d*) यस्तस्तम्भ सहसा

(*p*) वामदेवः

(*q*) मधुच्छन्दाः

(*r*) गृत्समदः

(*s*) शुनःशेपः

(A) *aq* *bs* *cp* *dr*

(B) *as* *bq* *cr* *dp*

(C) *ar* *bp* *cq* *ds*

(D) *aq* *br* *cs* *dp*

10. वेदाङ्गज्योतिषस्य प्रणेता कः ?

(A) पिङ्गलः

(B) याज्ञवल्क्यः

(C) लगधः

(D) यास्कः

11. ऐतरेयारण्यके कस्य महत्त्वं प्रतिपादितम् ?

(A) महाव्रतस्य

(B) आरुणकेतुकाग्नेः

(C) पुरातनभाषायाः

(D) जनकस्य

12. 'अक्षैर्मा दीव्यः कृषिमित् कृषस्व' इत्ययम् उपदेशः कस्मिन्सूक्ते वर्तते ?

(A) कृषिसूक्तम्

(B) अक्षसूक्तम्

(C) पर्जन्यसूक्तम्

(D) इन्द्रसूक्तम्

13. कस्मात् कारणात् सत्कार्यं भवति ?

(A) मनोऽनवस्थानात्

(B) सौक्ष्म्यात्

(C) सर्वसम्भवाभावात्

(D) समानाभिहारात्

14. महतः किम् उत्पद्यते ?

(A) अहङ्कारः

(B) ज्ञानेन्द्रियाणि

(C) कर्मेन्द्रियाणि

(D) पञ्चभूतानि

15. अधस्तनवाक्यानां सत्यासत्यत्वपर्यायेषु समीचीनं विचिनुत–

(*a*) सिकताभ्यः तैलोत्पत्तिः भवति ।

(*b*) प्रधानव्यतिरेकी पुरुषः अस्ति ।

(*c*) यदा सत्त्वमुत्कटं भवति तदा गुरूण्यङ्गानि भवन्ति ।

(*d*) पुरुषस्य साक्षित्वं नास्ति ।

(A) सत्यम्, असत्यम्, सत्यम्, सत्यम् ।

(B) असत्यम्, सत्यम्, सत्यम्, सत्यम् ।

(C) असत्यम्, सत्यम्, असत्यम्, असत्यम् ।

(D) सत्यम्, असत्यम्, असत्यम्, असत्यम् ।

16. अध्यारोपो नाम :

(A) अवस्तुनि वस्त्वारोपः

(B) वस्तुनि अवस्त्वारोपः

(C) वस्त्वस्तुभ्याम् अन्यत्रारोपः

(D) वस्त्वस्तुनोः परस्परारोपः

17. सूक्ष्मशरीरस्य कति अवयवाः सन्ति ?

(A) एकादश

(B) सप्तदश

(C) त्रयोदश

(D) पञ्चदश

18. देवदत्तः कः अस्ति ?

(A) उद्गिरणकरः

(B) उन्मीलनकरः

(C) पोषणकरः

(D) जृम्भणकरः

19. व्यष्ट्युपहितं चैतन्यं किमुच्यते ?

(A) विश्वम्

(B) विराट्

(C) वैश्वानरः

(D) धनञ्जयः

20. अधस्तनयुग्मपर्यायेषु समीचीनं विचिनुत ।

(*a*) अनैकान्तिकः

(*b*) अनुभवः

(*c*) अनुमानम्

(*d*) कारणम्

(*p*) चतुर्विधः

(*q*) त्रिविधः

(*r*) त्रिविधम्

(*s*) द्विविधम्

(A) *ar* *bp* *cq* *ds*

(B) *aq* *bp* *cs* *dr*

(C) *as* *br* *cp* *dq*

(D) *ap* *bq* *cr* *ds*

21. अग्निना सिञ्चेदिति न प्रमाणम् । किमर्थम् ?

(A) आकाङ्क्षाविरहात्

(B) योग्यताविरहात्

(C) सान्निध्याभावात्

(D) प्रामाण्याभावात्

22. नित्यः सम्बन्धः कः ?

(A) समवायः

(B) समवेत-समवायः

(C) संयुक्तसमवेतसमवायः

(D) असमवायः

23. आर्द्रेन्धनसंयोगः कस्य उदाहरणम् ?

(A) आश्रयासिद्धस्य

(B) स्वरूपासिद्धस्य

(C) सत्प्रतिपक्षस्य

(D) व्याप्यत्वासिद्धस्य

24. पञ्च विपर्ययभेदाः भवन्ति । कस्मात् ?

(A) करणवैकल्यात्

(B) बुद्धेर्विपर्ययात्

(C) भेदानां परिमाणात्

(D) कारणकार्यविभागात्

25. सर्वनामस्थानसंज्ञाविधायकं सूत्रं किम् ?

(A) स्वादिष्वसर्वनामस्थाने ।

(B) सुडनपुंसकस्य ।

(C) सर्वनामस्थाने चासंबुद्धौ ।

(D) सर्वनाम्नः स्मै ।

26. कति कारकाणि सन्ति ?

(A) सप्त

(B) त्रीणि

(C) षट्

(D) नव

27. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत –

(*a*) द्वियमुनम्

(*b*) नीलोत्पलम्

(*c*) हरिहरौ

(*d*) पीताम्बरः

(*p*) चार्थे द्वन्द्वः ।

(*q*) नदीभिश्च ।

(*r*) अनेकम् अन्यपदार्थे ।

(*s*) विशेषणं विशेष्येण बहुलम् ।

(A) *as* *bp* *cq* *dr*

(B) *ap* *bs* *cq* *dr*

(C) *ar* *bq* *cs* *dp*

(D) *aq* *bs* *cp* *dr*

28. 'अक्षान् दीव्यति' इति प्रयोगे अक्षपदस्य कर्मसञ्ज्ञा केन सूत्रेण सिध्यति ?

(A) कर्तुरीप्सिततमं कर्म ।

(B) अकथितं च ।

(C) तथायुक्तं चानीप्सितम् ।

(D) दिव: कर्म च ।

29. अधस्तनवाक्यानां सत्यासत्यत्वपर्यायेषु समीचीनं विचिनुत –

(*a*) तत्रोपपदमिति सूत्रम् उपपदसमास-विधायकम् ।

(*b*) सुहृद् इति अयं बहुव्रीहिसमास: ।

(*c*) 'आद् गुण:' इति गुणसंज्ञाविधायकं सूत्रम् ।

(*d*) 'दण्डेन घट:' इत्यत्र दण्डेन इति करणे तृतीया ।

(A) सत्यम्, असत्यम्, असत्यम्, सत्यम् ।

(B) असत्यम्, सत्यम्, असत्यम्, असत्यम् ।

(C) असत्यम्, असत्यम्, असत्यम्, सत्यम् ।

(D) सत्यम्, असत्यम्, सत्यम्, असत्यम् ।

30. अधस्तनवर्गयो: युग्मपर्यायेषु समीचीनं विचिनुत –

(*a*) सवर्णम्

(*b*) प्रगृह्यम्

(*c*) अपृक्त:

(*d*) टि

(*p*) ईदूदेद् द्विवचनम्

(*q*) तुल्यास्यप्रयत्नम्

(*r*) अचोऽन्त्यादि

(*s*) एकाल् प्रत्यय:

(A) *as* *br* *cp* *dq*

(B) *ap* *bq* *cs* *dr*

(C) *aq* *bp* *cs* *dr*

(D) *ar* *bs* *cq* *dp*

31. 'अर्धपिप्पली' इत्ययं समासः –

(A) अव्ययीभावः

(B) तत्पुरुषः

(C) केवलसमासः

(D) द्वन्द्वः

32. संयुक्तस्वराः कति वर्तन्ते ?

(A) त्रयः

(B) त्रयोदश

(C) चत्वारि

(D) पञ्च

33. 'चीनी' इतीयं भाषा वर्तते –

(A) अयोगात्मिका

(B) योगात्मिका

(C) प्रश्लिष्टयोगात्मिका

(D) अश्लिष्टयोगात्मिका

34. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत ।

(*a*) औ

(*b*) र

(*c*) ष

(*d*) ह

(*p*) संयुक्तस्वरः

(*q*) अन्तस्थः

(*r*) ऊष्मवर्णः

(*s*) महाप्राणः

(A) *as* *bp* *cr* *dq*

(B) *ap* *bq* *cr* *ds*

(C) *aq* *bs* *cp* *dr*

(D) *ar* *bs* *cq* *dp*

35. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत –

(*a*) घोषः

(*b*) अघोषः

(*c*) अल्पप्राणः

(*d*) महाप्राणः

(*p*) यवर्णः

(*q*) शवर्णः

(*r*) चवर्णः

(*s*) खवर्णः

(A) *ap* *br* *cq* *ds*

(B) *ar* *bs* *cq* *dp*

(C) *as* *br* *cp* *dq*

(D) *aq* *bp* *cr* *ds*

36. अधस्तनवाक्यानां सत्यासत्यत्वपर्यायेषु समीचीनं विचिनुत –

(*a*) 'बंगाली' इति आधुनिकार्यभारतीयभाषा

(*b*) 'अपभ्रंश' इति द्राविडीया भाषा

(*c*) 'ऊडिया' इति मध्यभारतीयार्यभाषा

(*d*) 'तमिळ्' इति प्राचीनार्यभारतीया भाषा

(A) सत्यम्, असत्यम्, सत्यम्, सत्यम् ।

(B) असत्यम्, सत्यम्, असत्यम्, सत्यम् ।

(C) सत्यम्, सत्यम्, असत्यम्, असत्यम् ।

(D) सत्यम्, असत्यम्, असत्यम्, असत्यम् ।

37. 'वागर्थाविव सम्पृक्तौ' इति काव्यांशः कुत्र वर्तते ?

(A) मेघदूते

(B) किरातार्जुनीये

(C) रघुवंशे

(D) कुमारसम्भवे

38. रोहसेनः इति पात्रं कस्मिन् नाटके वर्तते ?

(A) मृच्छकटिके

(B) स्वप्नवासवदत्तायाम्

(C) शाकुन्तले

(D) रत्नावल्याम्

39. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत –

(*a*) दैवायत्तं कुले जन्म

(*b*) अस्त्युत्तरस्यां दिशि देवतात्मा

(*c*) सहसा विदधीत न क्रियाम्

(*d*) कामार्ता हि प्रकृतिकृपणाः

(*p*) कुमारसम्भवम्

(*q*) वेणीसंहारम्

(*r*) मेघदूतम्

(*s*) किरातार्जुनीयम्

(A) *ap* *br* *cq* *ds*

(B) *aq* *bp* *cs* *dr*

(C) *ar* *bp* *cs* *dq*

(D) *aq* *bs* *cr* *dp*

40. शब्दस्य शक्तयः कति सन्ति ?

(A) तिस्रः

(B) चतस्रः

(C) द्वे

(D) पञ्च

41. उत्तररामचरिते कः रसः ?

(A) विप्रलम्भशृङ्गारः

(B) हास्यः

(C) वीरः

(D) शान्तः

42. अधस्तनवाक्यानां सत्यासत्यत्वपर्यायेषु समीचीनं विचिनुत –

(*a*) मेघदूतम् इति एतत खण्डकाव्यं विद्यते ।

(*b*) मृच्छकटिकम् इत्येद् नाटकं वर्तते ।

(*c*) 'मुद्राराक्षसम्' नाम प्रकरणम् ।

(*d*) 'मालतीमाधवम्' भवभूतिकवेः प्रकरणम् ।

(A) सत्यम्, सत्यम्, असत्यम्, असत्यम्

(B) असत्यम्, सत्यम्, असत्यम्, सत्यम्

(C) सत्यम्, सत्यम्, सत्यम्, असत्यम्

(D) सत्यम्, असत्यम्, असत्यम्, सत्यम्

43. 'वाक्यं रसात्मकं काव्यम्' इति काव्यलक्षणं कस्य ?

(A) मम्मटस्य

(B) विश्वनाथस्य

(C) भोजस्य

(D) भामहस्य

44. अधस्तनवर्गयो: युग्मपर्यायेषु समीचीनं विचिनुत –

(*a*) शृङ्गार:

(*b*) वीर:

(*c*) रौद्र:

(*d*) करुण:

(*p*) रति:

(*q*) शोक:

(*r*) क्रोध:

(*s*) उत्साह:

(A) *ar* *bs* *cq* *dp*

(B) *ap* *bs* *cr* *dq*

(C) *as* *bp* *cq* *dr*

(D) *as* *br* *cp* *dq*

45. कालानुक्रमेण ग्रन्थकारान् नियोजयत –

(*a*) मम्मट:

(*b*) पण्डितराज: जगन्नाथ:

(*c*) भामह:

(*d*) विश्वनाथ:

(A) *a* *c* *b* *d*

(B) *b* *a* *d* *c*

(C) *c* *a* *d* *b*

(D) *a* *b* *c* *d*

46. अधस्तनवाक्यानां सत्यासत्यत्वपर्यायेषु समीचीनं विचिनुत –

(*a*) रघुवंशमिति नाटकं वर्तते ।

(*b*) चारुदत्त: स्वप्नवासवदत्तस्य नायक: ।

(*c*) चन्द्रापीड: कादम्बर्या: नायक: ।

(*d*) सर्वदमन: शकुन्तलाया: पुत्र: ।

(A) असत्यम्, असत्यम्, सत्यम्, सत्यम् ।

(B) सत्यम्, सत्यम्, असत्यम्, असत्यम् ।

(C) सत्यम्, असत्यम्, असत्यम्, सत्यम् ।

(D) असत्यम्, सत्यम्, सत्यम्, असत्यम् ।

47. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत –

(*a*) दिलीपः

(*b*) यक्षः

(*c*) द्रौपदी

(*d*) उपहारवर्मा

(*p*) रघुवंशम्

(*q*) किरातार्जुनीयम्

(*r*) मेघदूतम्

(*s*) दशकुमारचरितम्

(A) *ap* *bq* *cr* *ds*

(B) *aq* *bs* *cp* *dr*

(C) *as* *bq* *cp* *dr*

(D) *ap* *br* *cq* *ds*

48. रघुवंशे कति सर्गाः ?

(A) पञ्चदश

(B) षोडश

(C) अष्टादश

(D) ऊनविंशतिः

49. रत्नावलीनाटकस्य कर्ता कः ?

(A) श्रीहर्षः

(B) भासः

(C) विशाखदत्तः

(D) शूद्रकः

50. 'दशकुमारचरितम्' इति कः वाङ्मयप्रकारः ?

(A) नाटकम्

(B) प्रकरणम्

(C) कादम्बरी

(D) आख्यायिका

## ROUGH WORK

## ROUGH WORK